तप्तोहं तरणेः कठोर किरणैः बालेतदस्यां महा -
नदयांस्नातुमसौ मया हृदवरः शक्यः प्रवेष्टुं किमु ।
मामापान्थहृदेद्यसन्ति बहवः दुर्जन्तवो केंस्तगे
गच्छेयुः तइति स्त्रियानिगदितं कालंप्रतीक्ष्यस्थितः ॥ 316 ॥

बाले कोवा प्रपायां नहिमदिह परः पान्थते पेक्षितं किं
बाले जाता पिपासा षथिक तवतुषा कुत्रशीतामृते मे ।
आस्ते कान्त द्विधातत् घटपट गतयोः कुत्र कान्ते पटेपि
स्याच्चेत् केषां द्विजानां इति कलवचनैः सूचयन्ती मचुंबत् ॥ 317 ॥

बाले विप्रकिमत्रवस्तु मधुनायुक्तं किमंभोरुहं
नैतत्पृष्टमिह क्षपेशवदने वासो मम प्रश्नभूः ।
तर्ह्यस्ति द्विज वाससो मधुकि मित्युक्तः सचातुर्यतः
तत्तेस्तिद्विज वाससीति पथिकः प्राह प्रपापालिकाम् ॥ 318 ॥

बाले देयं पयोमे पथिक पशु भवन्माहिषंवानतत् कं
किं शीर्षं नोवनन्त द्विपिनमवगतन्दण्डका खाण्डवंवा ।
नोवारः कस्य भानुप्रभृतिषु नविषं तद्धिहालाहलः किं
नोकाण्डः किं सदण्डः नहिनहि भुवनं भूर्भुवस्वः किमिष्टम् ॥

नोबाले पुष्करं तत् किमु करि करगं नो कृशं किं नुदर्भे
नो बाले तत्कबन्धं किमु वपुरशिरः सर्वतो वक्रमेतत् ।
किं तत् (ब्रह्मोत्तमांग) धातुश्शरीरं नरवलु धनरसः किं नव स्वादिमस्स्यात्
बाले जानीहि तन्नीरदसुममिति भोः किं सुमं दन्त युक्तम् ॥

कीलालं तद्धि रक्तं किमु नहिकमलं पङ्कजं किं तवेष्टं
नो तत् बालेऽमृतं स्यात् पथिक स भवतः कांक्षितः किन्तु मोक्षः ।
बाले कोनाममोक्षः पथिक रसिकदृक् गोचरो यस्सवेत्ति (?)
उक्तेतस्मिंस्तु नीवीं स्पृशति परवशा सा, प्रपापालिका भूत् ॥ 319 ॥

आलिंग्यश्लथनीविकां प्रियतमामारोप्य पर्यंकिकां
रन्तुं यत्नवति प्रिये जडनकिं दृश्यात्वया तादृशी ।
क्ष्माभृन्नर्तन चातुरीति कथितं छन्दं हि जानन् मुदा
लेभे तत्पुरुषायितोत्सव सुखं कामी कृतार्थोत्तमः ॥ 320 ॥



त्वत्कचात् कुसुमव्रातं मयिवर्षय कामिनि ।
इत्युक्ता नायिका यत्नं अकरोत्पुरुषायिते ॥ 321 ॥

चन्द्रबिम्बे तमः क्रीडा मया दृष्टा प्रियेनिशि ॥
इत्युक्ता सस्मिता बाला क्रीडा परवशा भवत् ॥ 322 ॥

कान्तेन्तरिक्षात् भगणाः पतन्ति पश्यास्य कालस्यहि वैपरीत्यम् ।
नो नाथ कालस्य तदावयोस्तु रतेरिति प्राह वधूस्मितेन ॥ 323 ॥

जारेण स्वगृहं गतेन सुतनुः नर्मालपन्ती रह-
स्यायाते दयिते निजे सखिसखि ज्ञातासि पुवेषतः ।
मन्नाथानुकृतिं करोषि तदलं याहीतिचोक्तश्शनैः
जारस्सोपससार कोहि वनितां जेतुं पुमान् शक्नुयात ॥ 324 ॥

कान्ते प्राप्य कवाटताडनकरे जारेण युक्तागृहे
पादस्थं अपवाहय कण्टकमथ प्राणेश्वरायाम्यहम् ।
इत्युक्त्वैव समाप्य तां रतिमहो निश्शंक सीत्कारतः
नीत्वा न्यायनमादरात् तमबला स्विन्ना कवाटं जहौ ॥ 325 ॥

रात्रौ बध्वा कवाटं ह्युपपतिमबला प्रीणयन्ती धवेना-
प्येत्य द्वारः कवाटे करतलनिहते साप्यनुद्धाटथ नाथ ।
कान्ता गेहानि गच्छ त्वमिहतु कलये ध्यान मेकाकिनी चे-
त्येवं जारस्ययावत्बहिरपसरणं प्राप मिथ्याप्रलापम् ॥ 326 ॥

रात्रौ जारयुता वधू पतिमपि प्राप्तं विदित्वाररं
प्रोद्धाटय प्रियलोचने करयुगादाबध्य लीलामिषात् ।
केयं ह्यत्र सखी वदेत्यकथयत् कांश्चित् सखीं सोवदत्
जारेचापि शनैर्गते नखलु काप्यत्रेति मुकत्वा हसत् ॥ 327 ॥

सखि रटति समन्तात् कुक्कुटै विह्लांगो मम गृहपति रेष्यत्यद्य निद्राकुलाक्षः ।
अररमर मिहोद्धाट्यादरा देहि शय्यां अवददिति शठन्तं प्राप्तमालोक्य कान्ता ॥ 328 ॥ ?



भृङ्गीभूतमहं विलोक्य सहसा कीटं विशोकाभवं
यातेे प्राणसमापते प्रियतमा तद्ध्यानतोहं परम् ।
भूत्वा सैव तवांगसंगमसुखं लप्स्ये भवान् किं करो-
त्यित्याहान्यवधूरतं स्वदयितं क्रोधाश्रु युक्ता वधूः ॥ 329 ॥

कस्त्वं पुष्पायुधस्य प्रियतम सचिवः चूतजीवातुरुर्व्या
स्त्रीकण्ठोदाहुतित्वे कविपरिगणितः कोकिलः तात कस्त्वम् ।
शिटाः श्राद्धादिकाले करधृतबलयः यं प्रतीच्छन्ति भकृत्या
सोहं रम्यस्वरूपः शुभतरनिनदः वायसाचार्य वर्यः ॥ 330 ॥

कस्त्वं लोहित पक्षकः चरसि भो ताक्ष्र्योण्डजानां पति
रेरे नोपि किमां कुतः कुलगुरः नोविष्णु वाहो जड ।
वाहः किन्वधिकः कुतोपि चगतेः मूढैतदास्तां भवान्
निंबंखादसिकिं नहीति करटैराकर्ण्य हीही कृतम् ॥ 331 ॥

यूयं केवा महान्तः नृपमुख धनिकैः लालिता वाहवर्थाः
सेनाङ्गे मुख्य भूताः कथयत किमुवः कर्षणश्रेष्ठविद्या ।
नोनोधिग्वः कएषः पुरतइह महान् लंबते हन्त शुण्डा
किं तत्कृत्यं जलाद्याहरण महह वो नाम किं नागराजाः ॥ 332 ॥ (द्यात्म)

केस्मन्तुल्याहि यूयं श्रुणुत रचितभू कर्षणा त्याद्यकृत्याः
मध्यान्ह स्नानतो थो रचित तृणजलाहार रोमन्थ केज्या : ।
सैरभ्या धर्मपत्न्या सह, रति सुखतः कालशेषं क्षिपन्तः
निद्रां कुर्मश्च गोष्ठाश्रम शुचिशयने, सैरभा वैदिकेन्द्राः ॥ 333 ॥

कस्त्वं ब्राहमण वैदिकोहि सुभगे, संगीत धीस्तेस्ति किं
स्वल्पा सा, मम तर्हि किंचन पदं ब्रूह्योमिषे माव्दिज ।
हन्तालं कति वा, स्वराः कथयमे संगीत धी रस्तिचेत्
चत्वारः सुभगे कथं सरिगमा नो तर्हि उदात्तादयः ॥ 334 ॥

Full Sloka not readable in the manuscript.
बाले कुत्रच नैपुणी तव भवेत् वीणा विधौ सा कदा वीणाभ्यास दशा ॥ 335 ॥



द्विजान् विसृज्यैव कदाचिदेषो प्रकाश्यवातान् पदजातमेव ।
वदत्यहो छान्दसतात्र हेतुः वर्णक्रमज्ञान विहीनतावा ।। 336 ।।

तिष्ठ स्वशास्त्रे तवकिं ममोर्ध्वे कोपं बलंवर्तति त्यक्ष क्रोधम् ।
आगच्छ येषा गृह रोचनस्य गुरोवयान्नं सवज्रं भुजावः ।। 337 ।। ?

नमेस्ति क्रोधः सखपाणिनित्वं साकंच क्षिप्रंवदश्लोकमुक्त्वा ।
एतव्दै एषस्य गृहे गच्छावो श्यामांच प्रायच्छ दयं ददाति ।। 338 ।। ?

समन्मथः सर्वजिदेकएव ध्रुवं तदत्यल्प शराहताश्चेत् ।
भवन्ति नारीगृहकुंभदासाः उपेन्द्रवज्रायुध शंकराद्याः ।। 339 ।।

अस्माभिश्चेत् त्वद्गुणाम्भोधि बिन्दुः ज्ञातुं शक्यो नैवलक्ष्मीश सापि ।
नावैतित्वां ध्यातियानन्य कात्मा हन्तिप्रज्ञा शलिनीयोपिपंक्तिः ।। 340 ।। ?

Slokas 341 and 342 not readable in the manuscript (torn).

सर्वे कदाचि दबला स्मरणान्मुनीन्द्राः यान्ति स्मरस्य वशतां चपलः प्रकृत्या ।
तत्सन्तिधौ न पुरुषः विकृतो भवेच्चेत् हय्यं ।। 343 ।।

तमोनिशामुखे नाथ पापरक्षस्तुबाधते ।
त्वभ्भक्तिजन्तु सत्वाख्यं अहस्तदवलुंपतु ।। 344 ।।

विभ्राजतेयद्यतयो विशन्ति- श्रीभूमिनीलेश्वर तेतुभक्ता ।
स्वर्गादि लोकान्निरयायमत्वा तदेव सययान्ति पदं सदायत् (विभ्राजते) ।। 345 ।।

लवण जलधि मध्यात् उत्थितं पांसु जालम् कपिभि रुदधिमध्ये पातिताः सेतु हेतोः ।
बृहदचलगणाये तन्नितंब प्रदेशे मद गज गण खाते चण्डवात प्रचारे ।। 346 ।।

गङ्गा रुरोद निधनान्नरकासुरस्य विष्ण्वंध्रि पंकज भवे क्षिति देव नद्यौ ।
स्वम्रीयतां अलभतावनि भूः सयस्याः साबन्धुवर्ग विरहासहन - स्वभावा । गङ्गारुरोद ।। 347 ।।



क्रिया सिद्धिः सत्वे भवति महातां नोपकरणे * * * *
यो नभ्राता न चरथगजोश्वादिनिवहाः ।
द्विष क्सेनासातु प्रबल बहुरक्षोगणयुता
तथापि श्रीरामः सबलखर मेको हनदरं । क्रियासिद्धिस्सत्वे ॥ 348 ॥

Slokas 349 and 350 not clear in the manuscript.

तिर्यक जन्तुरपि प्रकृष्ट मनघं धर्मं ररक्षाभ्दुतम्
व्याघ्रादाप्त भयः पुमान् तरुमगात् यस्तं प्लवंगोहृचपात् ।
नस्मिन्नप्यभय प्रदान कृति सद्रोहंचकारो धृणः
कीशस्सोपि महान् कृतघ्नमपि तंव्याध्रादरक्षत्पुनः । तिर्यक् जन्तुरपि ॥ 351 ॥

कालस्थान भिदावशात् भवति खल्वेकंहि वस्त्वन्यथा-
यश्चन्द्रो निशिभाति निस्तुल महाकान्तिः सएवाहनि ।
प्राप्नोत्यप्रभतां मयूरसभया नागाः शिवंचेद्गताः
प्राप्ते षड्वदनेपि वाह सहिते तिष्ठन्ति निस्साध्वसाः। कालस्थान ॥ 352 ॥

लवण जलधि मध्ये पुष्प वृष्टिः बभूव रघुकुलपति पत्नीं जानकीं दृष्टुकामात्
जलधिमतिगभीरं लंघयन्तं जवेन पवनं तनय मुद्दिश्यादरात् देव मुक्ता । लवण ॥ 353 ॥

Sloka 354 not readable in the manuscript.

## द्वाविंश प्रकरणं - अनुप्रासादिकम्
## छेकानुप्रासः

पुरापुरादितेयास्तु येनामृतमृतंसखें ।
तेन तेन विनाश्रेयो मेनमेनच्छिदं भज ॥ 355 ॥

मारमारमणः पातु नीर नीरज लोचनः ।
सारसारं क्वतत्ध्यानं धीर धीर तराक्वमे ॥ 356॥



# लाटानुप्रासः

शङ्करः शंकरोजिष्णुः जिष्णुः किंच विधिर्विधिः ।
सर्वान्तर्यामिन श्रीशे सहाये सन्ति केशवे ॥ 357 ॥

द्रौपदी द्रौपदी स्यात्किं पाण्डवाः पाण्डवाः कथम् ।
वृष्णयो वृष्णयः किंस्यु कृष्णे भवति नावनौ ॥ 358 ॥

# वृत्यतुप्रत्सः

शुचायि चेतः किमुते पयोमुचा कचाकचि क्रीडन दक्षया तया ।
रुचा लसन्तं हरि मिन्दिरापतिं निचाय्यतं मृत्यु मुखात्प्रमुच्यते ॥ 359 ॥

पारावारसुतापयोधरतटीपाटीरसारच्छटा
संचर्चापरभागकान्तिविलसद्धाराधर श्रीतनो ।
सारं भोरुड खर्व गर्व हर दृक् नारायण श्रीपते
घोरापारगभीरसंसृति महाकूपारतः पाहिमाम् ॥ 360 ॥

Sloka 361 and 362 not readable in the manuscript

# विरोधाभासः

गजास्यादर शालीशोप्यगजास्यादरो भवत् ।
विपक्षच्छिदपीन्द्रोभूत् अविपक्षच्छिदद्भुतम् ॥ 363 ॥

शेषार्चित पदांभो जोप्य शेषार्चित पद्हरिः ।
विराज मुखशाली सोप्य विराज मुखोद्भुतं ॥ 364 ॥

# पुनरुक्तवदाभासः

स्रष्टा स्वयंभूर्लोकेशः धाताजश्चतुराननः ।
जिष्णु स्वाराट सुरश्रेष्ठा हरिनारायणोवतु ॥ 365 ॥



सर्वज्ञ श्रीघनश्शास्ता भगवान् रघुनन्दनः ।
मनुष्य धर्मा श्रीदस्सराजराजोऽवतात्सदा ॥ 366 ॥

# त्रियोविंश प्रकरणं - निरोष्ठयादिकम्

## निरोष्ठ्यं यथा

सारस श्रीक चरण करनेत्रश्रियाधिकः ।
राका निशाकरास्यस्सः जयतात् श्रीकरः सदा ॥ 367 ॥

## निर्दन्त्यं यथा

शंख चक्रकर श्रीश शार्ङ्गपाणेऽमरप्रभो ।
अपार करुणागार पुण्डरीकाक्ष रक्षमाम् ॥ 368 ॥

## निर्मूर्धन्यं यथा

वसुदेव सुतानन्त वनमालिन् बलानुज ।
भक्तानन्दद गोविन्द नन्दनन्दन नन्दय ॥ 369 ॥

## निस्तालव्यं यथा

कमलासन कैलास वासवासव सादरम् ।
वन्दारुगण मन्दारं वन्देहं रघु नन्दनम् ॥ 370 ॥

## निष्कण्ठयं यथा

उर्वीश्रीदृति सुप्रीति नीति भूति स्थितिस्सुचित् ।
श्रुतिस्मृति निधिर्विष्णुः निर्भीतिश्शुचि मूर्ति धृत् ॥ 371 ॥

## निरन्तस्थं यथा

अब्जोपमान तुण्डाक्षि कण्ठः कैटभ नाशकः ।
भक्तजाल कृपासिन्धुः पातुमां मधुसूदनः ॥ 372 ॥

## यथा व

शचीपति मृडानीश पितामह मुखादृतम् ।
पाण्डुनन्दन सच्चित्तं भजेहं नन्द नन्दनम् ॥ 373 ॥

## निरुष्मकं यथा

जगदुत्पत्ति मुख्यानां कारणं कमलापतिम् ।
प्रपद्ये परमात्मानं प्रणतार्तिविलुण्ठनम् ॥ 374 ॥

## यथा वा

गंभीर तोयभव नाल विराजमान मार्ताण्ड भानु विकचामल पदनेत्रः ।
अम्भोज भूमृडमुखैः अभिवन्दितांघ्रिः अव्यादपार करुणांबुनिधिः मुरारिः ॥ 375 ॥

## सर्वलधु यथा

अघहरण चण सरसिरुह मदहर शुभ चरणयुग कमल नयन ।
अवसदयपद नयन कलशभवमुख, मुनिबिनुत रघुकुल तिलक ॥ 376 ॥

## सर्वगुरु यथा

अम्भोजाक्षः श्रीमान् विष्णु लक्ष्मीवक्षा वृष्णिश्रेष्ठः ।
पार्थप्राणः पायात् कृष्णः कंसारातिः संसारान्माम् ॥ 377 ॥



## गूढ प्रथमं यथा

कमलेक्षण माश्रयामिनित्यं कृपयामिश्र कटाक्ष मब्जनाभम् ।
क्षणदेशसमान वक्त्रभासं सकलेशं मुनिरक्षणैककृत्यम् ।। 378 ।।

## गूढद्वितीयं यथा

मुक्तिहेतुं अनवीनगीस्तुतं कंसमर्दनमुदाखीक्षणम् ।
योगिहार्द मसुरादिशिक्षकं सर्वलोक शरणं सदाश्रये ।। 379 ।।

## गूढत्रितीयं यथा

कुटिलालक मब्जसदृग्वदनं धुतभक्तभयं मुनिजालनुतम् ।
कमलानिलयं भजमानसमे जलजातसमेक्षण मार्तिहरम् ।। 380 ।।

## गूढ चतुर्थं यथा

क्षीराब्धिजा नयनचन्द्र मनादिदेवं दिव्यांगदं शुभमृडं द्रुहिणप्रवीरम् ।
देवादरं गुरुकृपा भजतां सुमित्रं नारयणं गरुडवाहवरंभजामि ।। 381 ।।

## अनावृत्तास्यकं यथा

अलकेश सहायांगः फणिमंच इदाभुजः ।
अनाथः खलघोधृष्ट इडा परिबृढोऽवतु ।। 382 ।।

## पादानुलोम प्रतिलोमं यथा

पालितामर धीशाजा जाशाधीरमतालिपा ।
पातुमा सममारामा मारामा मसमातुपा ।। 383 ।।

## अर्धातुलोम प्रतिलोमं यथा

कालकालतिकापाद पेशाजायिद घोरभा ।
भारधोदधिजा शापेदपाका तिलकालका ॥ 384 ॥ (Refer गदा बन्धः)

## चतुर्विंश प्रकरणं - यमकम्

पावितातिजड पामराधिपा पालितादृतजपामराधिपा ।
वामनीरचित कालि कादिमा पातुशोभितिलका लकादिमा ॥ 385 ॥

पालितामरगणे कमलेपा पालितामरस चन्द्र रुचे ।
देविमानतमवानघ शोभा देविमानत त बह्वनुकंपे ॥ 386 ॥

क्षीरवारिनिधिभूः कृपानिधिः दानवारिनिधिभूतलोचना ।
पालितामरसहस्र संस्तुता पातुतामरसहस्त शोभिता ॥ 387 ॥

निस्तुलानबधि रत्न भूषिते कौस्तुभाख्यमणि रत्न भूषिते ।
देहिमेबहुल भव्यदेहितां तावकापचिति भव्य देहिताम् ॥ 388 ॥

कुरुमय्यधिकां करुणां कमलेक्षणदेवि भजेतव पत्कमले ।
तवदास्यरतिं ददमे कमले न मनोरमते मम ना कमले ॥ 389 ॥

कलशोदधिजापते समस्ते भुवनेप्यस्तिहि नो पुमान् समस्ते ।
सहितस्सुगुणैर्भवान्मनोज्ञैः क्रियतेन्यत्र जने वृथा मनोज्ञैः ॥ 390 ॥

तं पुमांस महमाश्रये सतामाश्रये सरसिजोप मेक्षणे ।
यत्र लोक जननी रसास्थिते नीरसास्थिर फलान्तरैरलम् ॥ 391 ॥

क्षीरपयोधि सुतारमणोव्यात् नीरजसार विलोचन केन ।
तेनविना मम कागतिरन्या नीरजसारविलोचनकेन ॥ 392 ॥


Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

त्वद्वपुः परिमलादिक दृष्टौ पारिजात कुसुमेषु समांग ।
कस्य केशव भवेदभिलाषां पारिजात कुसुमेषु समांग ॥ 393 ॥

सौध संशोभितासार सालव्रता नस्थिरातस्य भूस्सार सालव्रता ।
तज्जयादुष्ट्याऽहन्तया मोहितं दुर्नृपं त्यज्यतं हन्तया मोहितम् ॥ 394 ॥ ?

पद्मा सपद्मा सशिकोविधाता दित्यात्मदित्यात्म भवादयस्तु ।
दासानुदासानुभवन्ति यस्य पायादपायादनधस्सविष्णुः ॥ 395॥

पुरान्तकासत्रिपुरान्तकाज षण्मुखा मराधीश मुखामरान् अपात् ।
समापतिः पात्वसमापतिर्हरिः नमामि तं यातु नामऽमितं भयम् ॥ 396 ॥

सोव्याद्यमुत्कृष्टतरं पराशरः सवेद येनैव हतः पराशरः ।
यस्मातु लांकोहि सदापराशरः सर्वोच्युतोकल्कष चित्पराशरः ॥ 397 ॥

मनोभवजरोगेण मनोभवजपीडया ।
सन्ततंमे हतम्मोहात् सन्ततं मेहसावतु ॥ 398 ॥

साऽदरा हरिणाक्षि श्री जितेन सततंधृता ।
सादरा हरिणाक्षि श्रीरिन्दिरा पातुमां सदा॥ 399 ॥

साधुता दययालक्ष्म्याऽसाधुता पापकारिणी ।
साधुता दयया लक्ष्म्याः साधुता सागता मया ॥ 400 ॥

## इति श्रीरामभद्र कविविरचिते चित्रकाव्ये
## प्रथमः परिच्छेदः

श्रीराम भद्रोदितचित्रकाव्ये आद्यः परिच्छेद उदाररीतिः ।
चतुश्शतश्लोक परिष्कृतोयं ययौ समाप्तिं यमकावसानः ॥

